शिक्षा मंत्रालय
MINISTRY OF
**EDUCATION**

कौशल विकास और उद्यमशीलता मंत्रालय
Ministry of **Skill Development And Entrepreneurship**

# भारतीय भाषा प्रौद्योगिकी परिषद्

भारतीयसौरदिनाङ्क ८ तथा ९ आश्विन शक १९४५ तमः, ३० सप्टेंबर-०१ऑक्टोबर-२०२३

स्थानम् - डॉ. आम्बेडकर-आन्ताराष्ट्रिय-केन्द्रम्, जनपथः, नवदेहली
https://technology-bharatiyabhasha.aicte-india.org/

## प्रौद्योगिकी भारतीयभाषा च इति विषयिणी परिषद्

प्रौद्योगिकी तथा च भारतीय-भाषा-समागमस्य त्रीणि चर्चाक्षेत्राणि सन्ति। तानि तु भारतीयभाषाणां कृते प्रौद्योगिकी, भारतीयभाषासु प्रौद्योगिकी, भारतीयभाषाभिः प्रौद्योगिकी च। भारतशासनस्य शिक्षामन्त्रालयस्य, भारतीयभाषासंस्थानम्, मैसूरू, इत्यस्य विश्वविद्यालय-अनुदान-आयोगस्य, अखिल-भारतीय-तन्त्रशिक्षण-परिषद्, राष्ट्रिय-शिक्षा-प्रौद्योगिकी-मञ्चः, भारतीय-भाषा-समितिः, राष्ट्रिय-शिक्षाअनुसन्धान-प्रशिक्षण-परिषद्, राष्ट्रिय-व्यावसायिक-शिक्षा-परिषद्, इत्येतैः एतस्य आयोजनं क्रियते। सर्वेषाम् अपि भागधारिणां ३०-सप्टेंबर-१-ऑक्टोबर-२०२३ इति दिनाङ्कयोः डॉ.-अम्बेडकर-आन्ताराष्ट्रिय-केन्द्रम्, जनपथः, नवदेहली इत्यत्र एकस्मिन् मञ्चे आनयनम् एतस्य उद्दिष्टम्, तथा च प्रौद्योगिक्याः साहाय्येन भारतीयभाषाणाम् उपयोगे सर्वेषु क्षेत्रेषु राष्ट्रिय-शिक्षा-नीतिः-२०२० इत्यस्याः उद्देशानां प्राप्तये विचारमन्थनम् इति।



अस्मिन् द्विदिवसीयशिखरसम्मेलने १००० प्रतिनिधिनां आतिथ्यं नवीदिल्यां भविष्यति इति अस्माकं अपेक्षा अस्ति। आयोजने अस्मिन् प्रस्तुतयः, प्रदर्शिन्यः समूहपरिचर्चाः,संगठनस्य अवसराः च भविष्यन्ति। अस्मिन् शिखरसम्मेलने भारतीयभाषासु, AI (कृत्रिमबुद्धिमत्ता) तथा ML (यंत्राधिगमः) इत्यनयोः शोधकर्तारः, शिक्षानवोन्मेषकम्पनयः, स्टार्ट-अपःउपयोक्तारः, एतादृशप्रौद्योगिक्याः नीतिनिर्मात्रेभ्यःप्रौद्योगिक्यां कार्यं कुर्वन्तः तकनीकीविशेषज्ञाः तथा संस्थाश्च भागं गृह्णन्ति। एतत् उपस्थितानां मध्ये विचारविनिमयस्य सहकार्यस्य च सुविधां करिष्यति, भारते विश्वे च भाषाप्रौद्योगिक्याः, अनुसन्धानस्य, तथा नवाचारस्य उन्नतिं प्रवर्धयिष्यति।

## सम्मेलनस्य विषयः

एनईपी-२०२० शैक्षिकावसरणां उपलब्धतां वर्धयितुं, समावेशनस्य विविधतायाः च चिन्ता संबोधनाय, देशे शैक्षिकप्रणाल्याः, अभिगमप्रसारस्य गुणवत्तायाः, समानतायाः, वहनीयत्वस्य, उत्तरदायित्वस्य च उन्नयनार्थं प्रौद्योगिक्याः उपयोगे महत् बलं ददाति।

सम्मेलनस्य उद्देश्यः वर्तमान-भाषा-पारितंत्रात् भारतीय-भाषा-परितंत्रे सम्यग् परिवर्तनाय प्रौद्योगिक्याः लाभं प्राप्तुं प्रयतेत्। भाषायाः प्रौद्योगिक्याः च संदर्भे त्रिषु प्रमुख-क्षत्रेषु उपरि बलं दत्तं।


- भारतीयभाषाणां कृते प्रौद्योगिकी
- भारतीयभाषासु प्रौद्योगिकी
- भारतीयभाषाभिः प्रौद्योगिकी

## भारतीयभाषाणां कृते प्रौद्योगिकी

विषयस्य अस्य पक्षस्य उद्देश्यः शिक्षणस्य, परीक्षणस्य, प्रशिक्षणस्य, अनुवादस्य च क्षेत्रेषु भारतीयभाषाणां कृते प्रौद्योगिक्याः उपयोगः अस्ति। अध्यापने ऑनलाइन-अफलाइन-इत्युभाभ्यां माध्यमभ्यां भारतीयभाषानां प्रशिक्षणं तथा अध्यापनं, पठन-पाठनसहायकसामग्रीनां विकासः, शिक्षाशास्त्रम् इत्यादयः सम्मिलिताः सन्ति।परीक्षणे भारतीयभाषासु भाषाप्रवीणतायाः विभिन्नस्तरस्य परीक्षणविधयः परीक्षाः च सम्मिलिताः सन्ति। प्रशिक्षणस्य तात्पर्यं सेवापूर्वं सेवायां च भाषा-विषयशिक्षकाणां, गुरुप्रशिक्षकाणां, भारतीयभाषासु पाठ्यपुस्तकलेखकानां प्रशिक्षणं, प्रौद्योगिक्याः उपयोगेन भाषामूल्यांकनमूल्यांकनयोः संलग्नानाम् परीक्षकानां विशेषज्ञानाञ्च प्रशिक्षणं च निर्दिशति।

अनुवादस्य उद्देश्यं भारतीयभाषाणां कृते भाषानुवादसाधनानाम् विकासः एवं उन्नयनं तथा च भारतीयभाषासु प्रशिक्षितानां अनुवादकानां विशालः समूहनिर्माणं अस्ति। एतदनुवादार्थं प्रौद्योगिक्याः आवश्यकतायाः आकलनं करिष्यति, भारतीयभाषासु प्रौद्योगिक्याः उपयोगेन डिजिटल-अनुवाद-पुस्तिकानां, मॉड्यूलानां च विकासः, करिष्यति।

## भारतीयभाषासु प्रौद्योगिकी



भारतीयभाषासु प्रौद्योगिकी इति एतादृशः एकः क्षेत्रः अस्ति यत्र राष्ट्रेण अद्यापि भारतीयभाषासु हार्डवेयर-सॉफ्टवेयर-उपकरणानाम् विकासे महती यत्नस्य अपेक्षा वर्तते। अस्य अर्थः अस्ति यत् भारतीयभाषासु भारतीयसञ्चालनप्रणालीनां (OS) तथा यंत्राधिगमस्य (ML) निर्माणं, कूटानाम् कार्यक्रमानां च लेखने भारतीयभाषायाः उपयोगः, सार्वभौमिकस्वीकृत्यर्थं भारतीयभाषायाः प्रौद्योगिकीयप्रयोगाय मुख्यमानकानां विकासः, भारतीयभाषायाः कृते विद्यमानः ओएस (OS) उपरि बहुस्तरीयविकासः, भारतीयभाषायाः कृते संजालमानकीकरणं, भारतीयभाषासु मोबाईल-एप्स-प्रौद्योगिक्याः विकासः, एआर (AR) (संवर्धित-वास्तविकता) आधारित-मञ्चानां विकासः, एआर/वीआर (AR/VR) (आभासी-यथार्थ) /एमवीआर (MVR) (मिश्रित-आभासी-वास्तविकता)/अनुरूपणेन सह भारतीय-भाषायाः एकीकरणम् /डिजिटल-संरूपणं इत्यादि। भारतीयभाषासु प्रौद्योगिक्याः निरन्तरविकासेन तथा मुख्यधारप्रवेशेन च संसाधनानाम् आवंटनं स्थानीयकरणं च कृत्वा अस्मिन् क्षेत्रे सर्वान् हितधारकान् एकत्र आनयितुं मुख्यं ध्यानं भविष्यति।

## भारतीयभाषामाध्यमेन प्रौद्योगिकी

यथा एनईपी- २०२० द्वारा परिकल्पितम्, यत् भारतीयभाषासु सामग्री-कार्य-प्रणाली-विकासमाध्यमेन अभियांत्रिकी-चिकित्सा- विधि-इत्यादीनां तथा अन्य -व्यावसायिकपाठ्यक्रमानाम् सहैव सर्वाः तकनीकीशिक्षाः प्रदातुं, संसाधनानाम् (यथा डिजिटलपाठ्यपुस्तकानि, अध्ययन-अध्यापनसामग्री, शब्दकोशाः) उपलब्धयितुं तथा भारतीयभाषासु शब्दावलीः), निर्धारिणं मूल्याङ्कनं च, विद्यालयेषु, व्यावसायिकशिक्षासंस्थासु, विश्वविद्यालयेषु तथा व्यावसायिकशैक्षिकसंस्थासु (यथा IITs, NITs, IIITs, IIMs, IISERs इत्यादिषु) भारतीयभाषायाः माध्यमद्वारा तकनीकीशिक्षायाः अतिरिक्तं कौशलपाठ्यक्रमं प्रदातुं।) तथा च भारतीयभाषायाः उपयोगविषये मुद्रित-सामाजिक-माध्यमानां कृते दिशानिर्देशाः मानकानि च सज्जीकर्तुं अस्य पक्षस्य अन्तर्गतं प्रमुखक्षेत्राणि सन्ति।

## परिषदः अवधेयम्

- प्रौद्योगिक्याः सहाय्येन भारतीयभाषानां माध्यमेन शिक्षाप्रदानस्य उपायनां अन्वेषणं करिष्यते।
- भारतीयभाषाणाम् उपयोगार्थं भारतीयभाषाप्रौद्योगिक्याः प्राधान्यक्षेत्राणाम् अभिज्ञानम्
- भारतीयभाषाणासु शैक्षिकसामग्र्याः अध्यापने, प्रशिक्षणे, परीक्षणे, अनुवादे च प्रौद्योगिक्याः समन्वयः
- भारतीयभाषाक्षेत्रे प्रौद्योगिकीसद्योविकासानां प्रदर्शनम्। ब्रेलमध्ये इतरेषु च भारतीयसंकेतभाषासंकेतेषु तान्त्रिकविकासः अत्र समाविष्टः भवेत्।
- सर्वेषु सार्वजनिकनिजिक्षेत्रेषु प्रौद्योगिकव्यवायैः भारतीयभाषाणां प्रवर्तनम्
- भारतीयभाषाभिः तासु च प्रौद्योगिकविकासस्य स्थितेः आह्वानानां च आकलनम्
- भारतीयभाषाभिः तासु च प्रौद्योगिक्याः भविष्यत्कालीनदिशः मार्गाः साधनानि च

## अपेक्षितः परिणामः

सम्मेलनं भारतीयभाषायै भारतीयभाषासु तथा तासां माध्यमेन प्रौद्योगिक्याः विकासाय उपयोगाय च मार्गचित्रस्योपरि एकं नीतिपत्रं आनेष्यति।

## सहभागः

अस्मिन् शिखरसम्मेलने भागं ग्रहीतुं शिक्षाविदः, उद्योगनेतारः, भाषाविशेषज्ञाः, भाषाविदः, शिक्षानवोन्मेष-कम्पनयः, राज्यसर्वकाराः, भाषाप्रौद्योगिकी-शोधकर्तारः तथा विकासकाः, नीतिनिर्णयकाः च आमन्त्रिताः सन्ति।

## पञ्जीकरणप्रक्रिया

https://technology-bharatiyabhasha.aicte-india.org/ इत्यत्र **पञ्जीक्रियताम्।**

परिषदि मर्यादितसंख्यया प्रतिभागिनः आहूता भवेयुः।


<u>संपर्कविवरणम्</u>

प्रा. शैलेन्द्रमोहनः

**निदेशकः**

**भारतीयभाषासंस्थानम्**

मानसगङ्गोत्री, हुन्सूरमार्गः

मैसूरु - ५७०००६,

कर्णाटकम्, भारतम्

**दूरवाणीक्रमाङ्कौ** + ९१-८२१-२३४५०००, +९१-८२१-२३४००६

**फॅक्सक्रमाङ्कौ** + ९१-८२१-२५१५०३२

विद्युत्पत्रसंकेतः director-ciil@gov.in